तत् परिच्छिद्यते" भा०। "प्राणवता शब्दात्" सू०। "सतीष्वपि प्राणानामधिष्ठात्रीषु देवतासु प्राणवता कार्यकरणसङ्घातस्वामिना शारीरेणैवैषां प्राणानां सम्बन्धः श्रुतेरवगम्यते। तथा हि श्रुतिः "अथ यत्रैतदाकाशमनुविषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणम्" इत्येवंजातीयका शारीरेणैव प्राणानां सम्बन्धं श्रावयति। अपि चानेकत्वात् प्रतिकरणमधिष्ठात्रीणां देवतानां न भोक्तृत्वमेकस्मिन् शरीरेऽवकल्पते। एको ह्ययमस्मिन् शरीरे शारीरो भोक्ता प्रतिसन्धानादिसम्भवादवगम्यते" भा०। "तस्य च नित्यत्वात्" सू०। "तस्य च शारीरस्यास्मिन् शरीरे भोक्तृत्वेन नित्यत्वं पुण्यपापोपलेपसम्भवात् सुखदुःखोपभोगसम्भवाच्च न देवतानाम्। ता हि परस्मिन्नैश्वर्ये पदेऽवतिष्ठमाना न हीनेऽस्मिंश्छरीरे भोक्तृत्वं प्रतिलब्धुमर्हन्ति। श्रुतिश्च भवति "पुण्यमेवामुं गच्छति न ह वै देवान् पापं गच्छति" इति शारीरेणैव च नित्यः प्राणानां सम्बन्धः" भा०। "उत्क्रान्त्यादिषु तदनुवृत्तिदर्शनात्" सू०। "तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" इत्यादिश्रुतिभ्यः। तस्मात् सतीष्वपि करणानां नियन्त्रीषु देवतासु न शारीरस्य भोक्तृत्वमपगच्छति, करणपक्षस्यैव हि देवता न भोक्तृपक्षस्येति" भा०। "त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्" सू०। "मुख्यश्चैकः इतरे चैकादश प्राणा अनुक्रान्ताः, तत्रेदमपरं सन्दिह्यते किं मुख्यस्यैव प्राणस्य वृत्तिभेदा इतरे प्राणा आहोस्वित् तत्त्वान्तराणीति। किन्तावत् प्राप्तं मुख्यस्यैवेतरे वृत्तिभेदा इति। कुतः श्रुतेः। तथाहि श्रुतिर्मुख्यमितरांश्च प्राणान् सन्निधाप्य मुख्यात्मतामितरेषां ख्यापयति "हन्तास्यैव सर्वे रूपमसामेति तत्र तस्यैव सर्वे रूपमभवन्" इति। प्राणैकशब्दत्वाच्चैकत्वाध्यवसायः, इतरथा ह्यन्याय्यमनेकार्थत्वं प्राणशब्दस्य प्रसज्येत एकत्र वा मुख्यत्वमितरत्र वा लाक्षणिकत्वमापद्येत। तस्माद् यथैकस्यैव प्राणस्य प्राणाद्याः पञ्च वृत्तयः एवं वागाद्या अप्येकादशेत्येवं प्राप्ते ब्रूमः। तत्त्वान्तराण्येव प्राणाद्वागादीनीति कुतः व्यपदेशभेदात्। कोऽयं व्यपदेशभेदः, ते प्रकृताः, प्राणाः श्रेष्ठं वर्जयित्वाऽवशिष्टा एकादशेन्द्रियाणीत्युच्यन्ते श्रुतावेवं व्यपदेशभेददर्शनात्। "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च" इत्येवंजातीयकेषु श्रुतिप्रदेशेषु पृथक् प्राणो व्यपदिश्यते पृथक् चेन्द्रियाणि। ननु मनसोऽप्येवं वर्जनम् इन्द्रियत्वेन प्राणवत् स्यात् "मनः सर्वेन्द्रियाणि च" इति पृथक् व्यपदेशभेददर्शनात्। सत्यमेतत् स्मृतौ तु एकादशेन्द्रियाणीति मनोऽपीन्द्रियत्वेन श्रोत्रादिवत् संगृह्यते, प्राणस्य त्विन्द्रियत्वं न श्रुतौ स्मृतौ वा प्रसिद्धमस्ति। व्यपदेशभेदश्चायं तत्त्वभेदपक्षे उपपद्यते। तत्त्वैकत्वे तु स एवैकः सन् प्राण इन्द्रियव्यपदेशं लभते न लभते च इति विप्रतिषिद्धं, तस्मात्तत्त्वान्तरभूता मुख्यादितरे। कुतश्च तत्त्वान्तरभूता मुख्यादितरे" भा०। "भेदश्रुतेः" सू०। "भेदेन च वागादिभ्यः प्राणः सर्वत्र श्रूयते "ते ह वाचमूचुः" इत्युपक्रम्य वागादीनसुरपाप्मविध्वस्तानुपन्यस्योपसंहृत्य वागादिप्रकरणम्, "अथ हेममासन्यं प्राणमूचुः" इत्यसुरविध्वंसिनो मुख्यस्य प्राणस्य पृथगुपक्रमात्, तथा "मनो वाचं प्राणं तान्यात्मनेऽकुरुत" इत्येवमाद्या अपि भेदश्रुतय उदाहर्त्तव्याः। तस्मादपि तत्त्वान्तरभूता मुख्यादितरे। कुतश्च तत्त्वान्तरभूता मुख्यादितरे" भा०। "वैलक्षण्याच्च" सू०। "वैलक्षण्यञ्च भवति मुख्यप्राणस्येतरेषाञ्च सुप्तेषु वागादिषु मुख्य एको जागर्त्ति "स एव चैको मृत्युनाऽनाप्तः। आप्तास्त्वितरे" तस्यैव प्राणस्यावस्थित्युत्क्रान्तिभ्यां देहधारणपातनहेतुत्वं नेन्द्रियाणां विषयालोचनहेतुत्वञ्चेन्द्रियाणाम्। न प्राणस्येत्येवंजातीयको भूयान् लक्षणभेदः प्राणेन्द्रियाणाम्। तस्मादप्येषां तत्त्वान्तरभावसिद्धिः। यदुक्तं "तत्र तस्यैव सर्वे रूपमभवन्" इति श्रुतेः प्राणएवेन्द्रियाणीति तदयुक्तम् तत्रापि पौर्वापर्यालोचनाद्भेदप्रतीतेः। तथा हि "वदिष्याम्येवाहमिति वाग्दध्रे" इति वागादीनीन्द्रियाण्यनुक्रम्य "तानि मृत्युः श्रमो भूत्वोपयेमे तस्माच्छ्राम्यत्येव वाक्" इति च श्रमरूपेण मृत्युना ग्रस्तत्वं वागादीनामभिधाय "अथेममेव नाप्नोत् योऽयं मध्यमः प्राणः" इति पृथक्प्राणं मृत्युनानभिभूतमनुक्रामति। "अयं वै नः श्रेष्ठः" इति च श्रेष्ठतामस्यावधारयति। तस्मात्तदविरोधेन वागादिषु परिस्पन्दलाभस्य प्राणायत्तत्वं तद्रूपभवनं वागादीनामिति मन्तव्यं न तु तादात्म्यम्। अत एव प्राणशब्दस्येन्द्रियेषु लाक्षणिकत्वसिद्धिः। तथा च श्रुतिः "तत्र तस्यैव सर्वे रूपमभवन् तस्मादेते एते नाख्यायन्ते प्राणाः" इति मुख्यप्राणविषयस्यैव प्राणशब्दस्य इन्द्रियेषु लाक्षणिकीं वृत्तिं दर्शयति। तस्मा-